सुधीः। महा-कालं हुनेद् यत्नात् पश्चाद् देवीं विशेषतः (५)। त्रिधा विभज्य विद्यां वै साधकः शुद्ध-मानसः (६)। मांसं रक्तं त्वचं (७) केशं नखं भक्तं च (८) पायसम्। आज्यं (९) चैव विशेषेण जुहुयात् सर्व-सिद्धये।

एवं कृते तु सर्वत्र लभते सिद्धिमुत्तमाम्। यद् यत् कामयते कामी (१०) तत् - तदाप्नोति निश्चितं। देव-वन्मानवो भूत्वा भुनक्ति बहुलं सुखम्।

तर्पणस्य विधिं वक्ष्ये येन कार्याणि साधयेत्। तर्पयेच्च पयोभिश्च रक्त-धारा-युतैस्तथा। मज्जाभिश्च (११) तथा तद्वत् स्वकीयेन परेण (१२) च। आकर्षितायाः कन्यायाः कुल प्रक्षालनेन च। मेष-माहिष-रक्तेन नर-रक्तेन चैव हि। मूष-मार्जार-रक्तेन तर्पयेद् देवतां परां।

एवं तर्पण-मात्रेण साक्षात् सिद्धीश्वरो भवेत्। कविता जायते तस्य द्राक्षा-रस-परम्परा। वृहस्पति-समो भूत्वा देव-वद् भुवि मोदते। न तस्य पाप-पुण्यानि जीवन्मुक्तो भवेद् ध्रुवं।

॥ श्रीकाली-तन्त्रे नैमित्तिक-विधिर्नाम तृतीयः पटलः ॥

पाठ-भेद

१ विधि-वदाहूय, २ जायतेऽचिरात्, दक्षिणा पूजिता भवेत्, कालिका पूजिता भवेत्, ३ दुर्लभं, होमकं, होमत; ४ मूको, ५ प्रयत्नतः, प्रपूजयेत्, ६ सिद्ध-मानसः, ७ तिलं, ८ भोज्यं च, ९ साज्यं, १० कामं, ११ रेतोभिश्च, १२ कचेन, करेण।

चतुर्थः पटलः

कामना-विधिः

भैरव उवाच—अथ काम्य-विधिं वक्ष्ये येन सर्वत्र सर्वगः। साधकः साधयेत् सिद्धि (१) देवानामपि दुर्लभां (२)। कुलागारं पुष्पितायाः दृष्ट्वा यो जपते नरः। अयुतैक - प्रमाणेन साधकः स्थिर-मानसः। केवलं गुप्त-भावेन स तु विद्या - निधिर्भवेत्। संस्कृताः प्राकृताः शब्दा लौकिका वैदिकाश्च ये (३)। वशमायान्ति ते सर्वे साधकस्य च नान्यथा। अथवा मुक्त - केशश्च हविष्याशी सुसंयतः (४)। प्रजपेदयुतं प्राज्ञ एतदेव (५) फलं लभेत्।

नग्नां पर-लतां पश्यन्नयुतं यस्तु साधकः। प्रजपेत् स भवेत् सद्यो विद्याया वल्लभः स्वयं। तस्य दर्शन - मात्रेण वादिनः कुण्ठतां गताः (६)। गद्य-पद्य-मयी वाणी तस्य वक्त्राद् प्रवर्तते (७)। तत्-पदे (८) सुधियः सर्वे प्रणमन्ति मुदान्विताः। तस्य वाक्य-(९) परिचयाज्जडा भवन्ति वाग्मिनः (१०)। अथवा मुक्त-केशश्च हविष्यं भक्षयेन्नरः। प्रजपेदयुतं तस्य एष प्रतिनिधिः स्मृतः।

धन-कामस्तु यो विद्वान् महदैश्वर्य-कामुकः। वृहस्पति-समो यस्तु भवितुं कामयेन्नरः (११)। अष्टोत्तर-शतं जप्त्वा कुलमा-

मंत्र्य मन्त्र-वित् (१२)। मैथुनं यः प्रयात्येव (१३) स तु सर्व-फलं लभेत्। लता-रतेषु जप्तव्यं महा-पातक-मुक्तये। लतां यदि न लभ्येत तदा मज्जां (१४) प्रयत्नतः। समुत्सार्य जपेन्मन्त्री सर्व-(१५) कामार्थ-सिद्धये।

तासां प्रहारं निन्दां च कौटिल्यम प्रियं तथा। सर्वथा च न कर्तव्यमन्यथा सिद्धि-रोध-कृत्। स्त्रियो देवाः स्त्रियः प्राणाः स्त्रिय एव विभूषणं (१६)। स्त्री - सङ्गिना सदा भाव्यमन्यथा स्व-स्त्रियामपि (१७)। विपरीत-रता सा तु (१८) भाविता हृदयोपरि। अष्टोत्तर-शतं जप्त्वा नासाध्यं विद्यते क्वचित्। तद्धस्तावचितं पुष्पं तद्धस्तावचितं जलं। तद्धस्तावचितं भोज्यं देवताभ्यो निवेदयेत्।

महा-चीन-द्रुम-लता-वेष्टितः साधकोत्तमः। रात्रौ यदि जपेन्मन्त्रं (१९) सैव कल्प-लता भवेत्। महा-चीन-द्रुम-लता-वेष्टनेन च यत्-फलं। तस्यापि षोडशांशेन कलां नार्हन्ति ते शवाः। शवासनाधिक-फलं लता-गेह-प्रवेशनं। श्मशानालयमागत्य मुक्त-केशो दिगम्बरः। जपेदयुत-संख्यं तु सर्व-कामार्थ-सिद्धये।

महा-चीन-द्रुम-लता-मज्जाभिर्विल्व-पत्रकं (२०)। सहस्रं देवीमभ्यर्च्य श्मशाने साधकोत्तमः। तदा राज्यमवाप्नोति (२१) यदि सा न पलायते। स्व-गात्र-रुधिराक्तैश्च विल्व - पत्रैः सहस्रशः। श्मशानेऽभ्यर्च्य कालीं तु (२२) वागीश-समतां व्रजेत्।

अनादिकां तथा (२३) दृष्ट्वा लक्षं जपति भूमिपः। निर्मलां (२४) च तथा दृष्ट्वा वश्यार्थमयुतं जपेत्।

॥ श्रीकाली-तन्त्रे कामना-विधिः नाम चतुर्थः पटलः॥

पाठ-भेद

१ सर्वं, २ दुर्लभं, ३ वैदिका अपि, वैदिकास्तथा, ४ हविष्यं भक्षयेन्नरः, ५ प्रजप्य चायुतं प्राज्ञस्तदेव हि।

६ निष्प्रभा मताः, ७ प्रजायते, ८ तन्नाम्ना, ९ काव्य, १० जड़ी भवति वाल्मीकः, ११ कामयते स्वयं, भूत्वा कवित्वं कारयेत्तथा, १२ यत्नतः, १३ करोत्येषः, प्रयात्येषः, १४ यदि न सङ्गच्छेत् तदा शुक्रं, यदि संसर्गस्तदा शुक्रं, १५ धर्म, ततो जप्यं सर्वं,

१६ स्त्रियो देव्यः स्त्रियः पूज्याः स्त्रिय एव हि भूषणं, १७ स्व-स्त्रिया अपि, १८ रतासक्ता, रतामत्ता।

१९ मन्त्री, २० पत्रकैः, २१ तु राज्यमाप्नोति, २२ देवीं च, २३ मूल-विद्यां लतां, अनादितां तथा, अनुदितां यथा, २४ विमलां।

पंचमः पटलः

सिद्ध-विद्या-विधिः

भैरव उवाच—अथातः सम्प्रवक्ष्यामि मन्त्रं कल्प-द्रुमं परं। येन जप्तेन विधि-वत् सिद्धयोऽष्टा भवन्ति हि। यस्याः स्मरण-मात्रेण वाचश्चित्रायते(१) नृणां। यज्-ज्ञाना(२)दमरत्वं च लभेन्मुक्तिं चतुर्विधां। ये जपन्ति परां देवीं नियमेन तु संस्थिताः (३)। देवाः सर्वे नमस्यन्ति किं पुनर्मानवादयः।

वृहस्पति-समो वाग्मी धने धन-पतिर्भवेत्। काम - तुल्यश्च नारीणां रिपूणां शमनोपमः (४)। तस्य पादाम्बुज-द्वन्द्वं राज्ञा किरीट(५) भूषणं। तस्य भूतिं विलोक्यैव कुबेरोऽपि तिरस्कृतः। य एनां पूजयेद् देवीं नियमे (६) पितृ-कानने। तस्य चाज्ञा-कराः (७) सर्वे सिद्धयोऽष्टौ भवन्ति हि।

तस्यैव जननी धन्या पिता तस्य सुरोपमः (८)। सम्प्रदाय-विदां वक्तां य एनां वेत्ति तत्वतः। अस्या विज्ञान-मात्रेण कुल-कोटीः समुद्धरेत्। नंदन्ति पितरः सर्वे गाथां गायन्ति ते मुदा (६)। अपि नः स्व-कुले कश्चित् कुल-ज्ञानी भविष्यति। स धन्यः स च विज्ञानी स कविः स च पंडितः। स कुलीनः स सु-कृती स वशी स च साधकः। स ब्राह्मणः स वेदज्ञः सोऽग्नि - होत्री स दीक्षितः (१०)। स तीर्थ-सेवी पीठानां स निवासी स सर्वदः।

स सोम-पायी स व्रती स यज्वा स च साधकः (११)। स संन्यासी च योगी च स मुक्तः (१२)स च ब्रह्म-वित्। स वैष्णवः स शैवश्च स सौरः स च गाणपः। स च विज्ञान-वेत्ता च य एनां वेत्ति तत्वतः। तस्मात् सर्व-प्रयत्नेन सर्वावस्थासु सर्वदा। एनां ज्ञात्वा यजेन् (१३) मन्त्रो सुख-मोक्ष-फल-प्रदां (१४)।

नमः पाशांकुशे द्वेधा फट् स्वाहा कालि कालिके। दीर्घ-तनुच्छदः काली - मनुः पञ्च - दशाक्षरः। अनया सदृशी विद्या त्रैलोक्ये नापि विद्यते।

विद्या-रत्नं प्रवक्ष्यामि श्रुत्वा कर्णावतंस-वत् (१५)। माया-द्वयं कूर्च-युग्ममैन्द्रान्तम् मादन(१६)त्रयं। माया-विन्द्वीश्वर-युतं दक्षिणे कालिके पदं। संहार-क्रम-योगेन वीज - सप्तकमुद्धरेत्। एक-विंशत्यक्षराढ्यस्ताराद्यः(१७)कालिका-मनुः। पूर्वोक्त-मन्त्र-वत् कुर्यात् पूजां सर्वां विचक्षणः।

॥ श्रीकाली-तन्त्रे सिद्ध-विद्या नाम पञ्चमः पटलः ॥

पाठ-भेद

१ मुक्तिस्तु जायते, २ यजना, ३ नियमेन शवे स्थितां, सदा दैवीं नियमेन नर - स्थितां, नियमेन नराः स्थिताः, ४ रिपूणामनलोपमः, रिपूणां च यमोपमः, ५ मुकुट, ६ तु यजेद्देवीं नियमे, चिन्तयेद्देवीं नियमे, चिन्तयेन्मंत्री नियतः, ७ तस्येवाज्ञा-कराः, ८ तातस्तस्य शिवोपमः, ९ सर्वदा, १० सर्व-दीक्षितः स च भूमिपः।

११ स व्रती सोम-पायीस, स यज्वा स च दीक्षितः, १२ स सोमपायी संन्यासी स योगी, १३ जपेन् १४ महालयां, महा-फलं, १५ श्रोतुः कर्णावतंसकं, १६ मदन, १७ ढ्यः प्रोक्तोऽयं।

षष्ठः पटलः

वीर-साधना

भैरव उवाच—शृणु देवि ! वरारोहे ! वीर-साधनमुत्तमं। नृणां शीघ्र - फलावाप्त्यै प्रकारान्तरमुच्यते। चतुष्पथे चतुर्दिक्षु पुरुषं हृदयं खनेत्। जीवितं ब्रह्म-रन्ध्रे वै दीपान् प्रज्वा-

लयेत्(१) सुधीः। मध्ये तथा खनेदेकं तत्र मूर्द्धासनं (२) भवेत्। पूर्वोक्तेन च मार्गेण तत्र संस्कारमाचरेत् (३)। महा - कालादि-देवेभ्यो बलिं पूर्ववदाहरेत्। कल्पोक्त-पूजां संपूज्य जपेत् प्रयत-(४) मानसैः। दन्ताक्ष - मालया चैव राज - दंतेन मेरुणा। दिग्वासाः प्रजपेन्मन्त्रमयुतं सर्व-दैवतं। जपान्ते च बलिं दत्वा दक्षिणां विभवावधि। सर्व - सिद्धीश्वरो विद्वान् सर्व - देव-नमस्कृतः।

अथवा विजनेऽरण्ये स्थिर-योगासनो(५)नरः। उदयास्तं दिवा जप्त्वा सर्व-सिद्धीश्वरो भवेत्। (विल्व-वृक्षे निज-क्रोड़े शवमा-रोप्य यत्नतः। नृसिंह-मुद्रया वीक्ष्य जपेन्मातृकया नरः। सहस्रं तत्र जप्त्वा वै सर्व-सिद्धीश्वरो भवेत्)। वट-मूले शवं नीत्वा तत्र देवीं प्रपूज्य च। सुप्त्वा (६) तत्र मनुं जप्त्वा सर्व - सिद्धीश्वरो भवेत्। कर-काञ्चीं समादाय मुण्डमाला - विभूषितः। तेनैव तिलकं(७)कृत्वा तत्तद्-भस्म-विभूषितः। श्मशाने च सकृज्जप्त्वा सर्व-सिद्धीश्वरो भवेत्। कुंकुमागुरु-कस्तूरी-रोचनागुरु-चन्दनं। कर्पूरं पद्मरागं च केशरं हरि-चन्दनं। एकत्र साधितं कृत्वा प्रत्येकं साधयेत् ततः (८)। एतत्-तिलक-मात्रेण राजानं वशमा-नयेत्।

जिह्वाग्रे रुधिरं कृत्वा (९) आकाशे च समाहरेत्। तेनैव गुटिकां (१०) कृत्वा भद्र-कालीं ततो (११) जपेत्। नीलां नील-पताकां च ललज्जिह्वां करालिकां। ललाट-तिलकं कृत्वा साधको

वीतभीः स्वयं। महाष्टमी-नवम्योस्तु संयोगे पुरतः स्थितः। छाग-महिष-मेषाणां चतुर्दिक्षु शरान् क्षिपेत्। कबन्धान् मुण्ड - पुञ्जं च (११) दीपादिभिरलंकृतं (१२)। मध्ये कबन्धमास्तीर्य तत्र गन्धर्व-रूप-धृक्। ताम्बूल-पूर - रक्तास्यमञ्जनाञ्चित - लोचनं। कृत्वा काली-मनुं (१३) जप्त्वा सर्व-सिद्धीश्वरो भवेत्।

वियद्-रवि-युतं देवि ! नेत्रान्तं चन्द्र-भूषितं। वीजं प्रत्येक-द्रव्याणां मिलितानां च पार्वति ! मूल-मन्त्रेण मन्त्रं यो (१४) जपेत् साष्ट-शत-त्रयं (१५)। जिह्वाग्रे रुधिरं गृह्ण चामुण्डे घोर-निःस्वने ! वलिं गृह्ण वरं देहि रुधिरं गगनेऽमले। कालि कालि प्रचण्डोग्रे ततोऽस्त्रं (१६) कवचं ततः। कालिकेयं समाख्याता वीराणां हित-काम्यया।

कूर्च-युग्मं महा-देवि ! नीलायाः कथितं तव। वियद्-भृगु-युतं देवि ! कल-मिश्रं रवी रतिः। चन्द्र-खण्ड - समायुक्तं ततो नील-पदं ततः। पताके हूँ फडन्ते (१७) स्यात् पूर्व-कूट- (१८) मनुर्मतः। सु-गुप्तेयं महा-विद्या तव स्नेहादिहोदिता (१९)। जय-श्री-करणी (२०) देवी पताकेव(२१) रण-स्थले। तेन नील-पताकेयं विद्या वै वीर-(२२) साधने। उग्र-चण्डा महा - विद्या या पुरा कथिता प्रिये ! ललज्जिह्वा तु सा प्रोक्ता योज्या वै वीर-(२३) साधने। याऽसौ विद्या (२४) महा-तारा सा करालेति कीर्तिता।

भूमि-पुत्र-समायुक्ता याऽमावास्या शुभोदया (२५)। भाद्रे पुमृक्ष-योगेन (२६) तस्यां वीर-वरोत्तमः। विष्णु-क्रान्तां समा-

नीय निक्षिपेन्मृत-भूमिषु । तत्र तां साधितां कृत्वा तद् - दिने मत्स्य-हट्टके (२९) । तत्र तं साधितं (३०) मत्स्यमेक-मूल्येन दापयेत् । तज्जलेनाभिषेकं च पूर्ववच्च शिरोपरि(३१)। साधितां विजयां तस्य उदरे मुख-वर्त्मना । क्षिप्त्वा तत्र खनेन्मत्स्यमञ्ज-नाञ्चित-लोचनः । पूर्व-द्रव्येण तिलकमुत्थाय (३२) च मनुं जपेत् । स्वयं वै तत्र (३३) भगवान् भैरवो लगुडान्वितः । गत-भीतिस्ततो वीरस्तं विलोक्य जपेन्मनुं । यदि भाग्य-वशाद् देवि! लगुडस्तत्र लभ्यते । तदा स्वयं भैरवोऽसौ स्वयं वीरेश्वरो भवेत् ।

मत्स्यमानीय देवेशि ! निक्षिपेत् पितृ-कानने । तत्रासकृज्ज-पित्वा तु देवता-मेलनं भवेत् (३४) । तत्र नत्वा महा-देवं महा-देवीं च भाविनि (३५) ! तद्-भस्म तिलकं कृत्वा स्वयं वीरे-श्वरो भवेत् ।

निशायां मृत - हट्टे च उन्मत्तानन्द - भैरवः । दिग्वासा विमली भस्म-भूषणो मुक्त-केशकः । कपाली खड्ग-हस्तश्च जपेन् मातृकया यदि । तदा तस्य महा-देवि ! सर्व-सिद्धिः करे स्थिता (३६) । डाकिनीं योगिनीं वापि अन्यं वा भूतलाङ्गनां । तत्रा-प्यानीय (३७) संपूज्य सर्व-सिद्धीश्वरो भवेत् ।

सर्वेषां जीव-हीनानां जन्तूनां वीर - (३८) साधने । ब्राह्मणं गोमयं त्यक्त्वा(३९) साधयेद् वीर-साधनं । मृतासनं विना देवि !

पूजयेत् पार्वतीं शिवां । तावत् कालं वसेद् घोरे यावदाहूत-संप्लवं । महा-शवाः प्रशस्ताः स्युः प्रधान-(४०) वीर - साधने । क्षुद्राः प्रयोग-कर्तॄणां प्रशस्ताः सर्व-सिद्धिदाः । एवं वीर-(४१) क्रमं देवि ! कथितं च तवानघे ! न कस्यचित् प्रवक्तव्यं (४२) मम (४३) प्रीत्या महेश्वरि !

॥ श्रीकाली-तन्त्रे वीर-साधना नाम षष्ठः पटलः ॥

पाठ-भेद

[पृष्ठ ३१, अन्तिम में 'करालिनीं' के पाठ-भेद का क्रमांक (१२) होना चाहिये । फलतः पृष्ठ ३२ के पहले पाठ-भेद क्रमाङ्क (११) को (१३) कर लें और अन्तिम (२६) को (२८)]

१ लयेदिति, लयेद्दिशि, २ तथा मृद्वासनं स्तरेत्, तत्र शुद्धासनं भवेत्, ३ मारभेत्, ४ नियत, ५ स्थिर शय्यासनो, अस्थि-शय्यासनो, ६ स्थित्वा, ७ जिह्वाग्रे रुधिरं, ८ साधयेत् सुधीः, ९ वीर, १० वटिकां, ११ तत्र काली-मनुं, १२ करा-लिनीं, १३ कवन्ध-मुण्ड-पुंजं च, कवन्धान् मुण्ड-पुञ्जादीन्, १४ लंकृतान्, १५ तत्र मनुं, १६ मन्त्रज्ञो, १७ सार्द्ध-शत-द्वयं, सार्द्ध-शत-त्रयं, १८ ततः फट्, १९ फडन्तं, २० पूर्व-कूर्चं, २१ न्मयो-दिता, २२ करिणी, २३ पताकेयं, २४ योज्या वै नील, २५ नील, मयोक्ता वै संयोज्या नील, २६ आदि-विद्या, या सा विद्या, २७ शुभ-प्रदा, २८ पुष्कर-योगेन, पुष्यर्क्ष-योगेन, २९ मृत-हट्टके, मृत-सूतके, ३० प्रसारितं, ३१ शवोपरि, ३२ तिलकं पूर्व-द्रव्येण उत्थाय, तिलकी सर्व-द्रव्येण उत्थाय, ३३ स्वयमायाति, ३४ तत्र सकृज्जपित्वा तु देवतामिव लंघयेत्, ३५ भामिनि, ३६ प्रजायते, ३७ तत आनीय, ३८ नील, ३९ गोमये कृत्वा, ४० कालिका । ४१ नील, ४२ प्रयोक्तव्यं, ४३ तव ।

सप्तमः पटलः

रहस्य-पुरश्चरण-विधिः

देव्युवाच—ज्ञातमेतन्मया देव (१) ! त्वत्प्रसादान्महेश्वर ! अशक्तानां तु मे देव ! पुरश्चरणमुच्यतां । सिध्यन्ते च यथा मन्त्रा लभन्ते सिद्धिमुत्तमां ।

भैरव (२) उवाच—श्मशाने च पुरश्चर्या कथिता भुवि (३) दुर्लभा । अथवान्य-प्रकारेण पुरश्चरणमिष्यते (४) । कुजे वा शनिवारे वा नर-मुण्डं समाहृतं । पञ्च-गव्येन मिलितं चन्दनाद्यैर्विशेषतः । निक्षिप्य भूमौ हस्तार्ध-मानतः कानने वने । तत्र तद्-दिवसे रात्रौ सहस्रं यदि मानवः एकाकी प्रजपेन्मन्त्रं स भवेत् कल्प-पादपः ।

अथवान्य-प्रकारेण पुरश्चरणमिष्यते (५) । शवमानीय तद्-द्वारे तेनैव परि - खन्यते (६) । तद् - दिनात् तद् - दिनं यावत् तावदष्टोत्तरं शतम् । स भवेत् सर्व - सिद्धीशो नात्र कार्या विचारणा ।

अथवान्य-प्रकारेण पुरश्चरणमुच्यते । अष्टम्यां च चतुर्दश्यां पक्षयोरुभयोरपि । सूर्योदयात् समारभ्य यावत् सूर्योदयान्तरं । तावज्जप्त्वा निरातङ्कः सर्व-सिद्धीश्वरो भवेत् ।

अथवान्य-प्रकारेण पुरश्चरणमिष्यते । चन्द्र-सूर्य-ग्रहे चैव (७) ग्रासादधि-विमुक्तितः । यावत्-संख्यं मनुं जप्त्वा तावद् (८) होमादिकं चरेत् । सूर्य-ग्रहण-कालाद्धि नान्यः कालः

प्रशस्यते (९)। तत्र यद्-यत् कृतं कर्म तदनन्त-फलं लभेत् (१०)।

अथवान्य-प्रकारेण पुरश्चरणमिष्यते। शरत्-काले चतुर्थ्यादि-नवम्यन्तं विशेषतः। भक्तितः पूजयित्वा तु रात्रौ तावत् सहस्रकं। जपेदेकाकी (११) विजने केवलं तिमरालये। अष्टम्यादि-नवम्यन्तमुपवास-परो भवेत्। अन्यत्र गुरु-मार्गस्य लंघनं नैव कारयेत्।

अथवान्य-प्रकारेण पुरश्चरणमिष्यते (१२)। अष्टमी-सन्धि-वेलायामष्टोत्तर-लता-गृहं। प्रविश्य मन्त्री विधिवत् ताः समभ्यर्च्य यत्नतः। पूर्वोक्त-कल्पमासाद्य पूजादिकं समाचरेत्। केवलं कामदेवोऽसौ जपेदष्टोत्तरं शतं। तासां तु पत्र-मूलेषु उल्कां संगृह्य मस्तके (१३)। मन्त्र-सिद्धिर्भवेत् सद्यो (१४) लता-दर्शन-पूजनात्।

अथवान्य-प्रकारेण पुरश्चरणमुच्यते। आकृष्टायाः कुला-गारे (१५) लिखित्वा (१६) मन्त्रमेव च। सम्पूज्य (१७) तत्र संस्कारं कृत्वा तस्यै निवेद्य च(१८)। किञ्चिज्जप्त्वा मनुं नीत्वा देवता-भाव-तत्परः। तां विसृज्य नमस्कृत्य स्वयं जप्त्वा सु-संयतः। प्रातः स्त्रीभ्यो बलिं दत्वा मन्त्र-सिद्धिर्न संशयः।

अथवान्य-प्रकारेण पुरश्चरणमिष्यते। गुरुमानीय संस्थाप्य ईश-वत् पूजनं विभोः। वस्त्रालङ्कार-हेमाद्यैः सन्तोष्य गुरुमेव च। तत्-सुतं तत्-सुतां चैव तत्-पत्नीं च विशेषतः (१९)। पूज-यित्वा मनुं जप्त्वा स्वयं सिद्धीश्वरो भवेत्।

अथवान्य-प्रकारेण पुरश्चरणमिष्यते। सहस्रारे गुरोः पाद-पद्मं ध्यात्वा प्रपूज्य च। केवलं देव-भावेन जप्त्वा सिद्धीश्वरो भवेत्। गुरवे दक्षिणां दद्याद् (२०) यथा - विभवमात्मनः। गुरोरनुज्ञा-मात्रेण दुष्ट-मन्त्रोऽपि सिद्ध्यति। गुरुं विलंघ्य शास्त्रेऽस्मिन्नाधिकारः सुरैरपि। एषां च मन्त्र-तन्त्राणां प्रयोगः क्रियते यदि। गुरु-वक्त्रं विना देवि! सिद्धि-हानिः (२१) प्रजायते।

अथवान्य-प्रकारेण पुरश्चरणमिष्यते। स्वकीयां परकीयां वा स्त्रियमानीय साधकः। शतमष्टोत्तरं जप्त्वा योनिमामन्त्र्य तत्व-वित्। गच्छन् परम-तत्वज्ञः सहस्रं जपते यदि। तदा मन्त्रो भवेत् सिद्धो दुष्ट-मन्त्रोऽपि पार्वति! एतत् त्प्रयोगं देवेशि! न कस्मै दर्शयेत् क्वचित्। एतन्मन्त्रं च तन्त्रं च शिष्येभ्योऽपि न दर्शयेत्। यदि वा दर्शयेन्मोहात् कु-बुद्धिः कुल - नाशकः। अन्यथा प्रेत-राजस्य भवनं याति निश्चितं (२२)।

।। श्रीकाली-तन्त्रे रहस्य-पुरश्चरण-विधिः नाम सप्तमः पटलः ।।

पाठ-भेद

१ ज्ञानमेतन्महादेव; ज्ञातमेतन्महादेव, २ भगवान्, ३ देवि, ४ मुच्यते, ५ मुच्यते, ६ परिखन्य च, ७ चन्द्र-सूर्योपरागे च, ८ जप्त्वा ताव; जपेन्मन्त्रं ताव, ९ विशिष्यते, १० सर्वमनन्त-फलदं भवेत्; अत्र यद् यत् कृतं कर्म तदनन्ताय कल्प्यते, ११ देकस्तु, १२ मुच्यते, १३ पद-मूलेन उक्त्वा संगृह्य कर्णके; पाद-मूलेन उग्रां सम्पूज्य यत्नतः, १४ तस्य, १५ फन्ताः कति-लतागारे, १६ भावयेत्, १७ प्रपूज्य, १८ निवेदयेत्, १९ तथैव च, २० दत्वा, २१ नैव सिद्धिः, २२ तस्य जायते।

अष्टमः पटलः

आचार-विधिः

भैरव उवाच—अथाचारं प्रवक्ष्यामि यत्कृते (१) ऽमृतमश्नुते। सर्व-भूत-हिते युक्तः समयाचार-पालकः। अनित्य - कर्म-सन्त्यागी नित्यानुष्ठान - तत्परः। मन्त्राराधन - मात्रेण शिव-भावेन (२) तत्परः। परस्यां देवतायां च सर्व-कर्म - निवेदकः। अन्य-मन्त्रार्चन-श्रद्धामन्य-मन्त्र-प्रपूजनम्। कुल-स्त्री-वीर-निन्दांच तद्-द्रव्यस्याप-हरणं। स्त्रीषु रोषं प्रहारं च वर्जयेन्मतिमान् सदा।

स्त्री-मयं च जगत् सर्वं स्वयं तावत् (३) तथा भवेत्। पेयं चर्व्यं तथा चोष्यं भक्ष्यं भोज्यं गृहं स्वयं (४)। सर्वं च युवती-रूपं भावयेन्मतिमान् सदा(५)। कुलजां युवतीं वीक्ष्य नमस्कुर्यात् समाहितः (६)। यदि भाग्य-वशेनैव कुल-दृष्टिस्तु जायते (७)। सदैव मानसीं पूजां तत्र तासां प्रकल्पयेत्। बालां वा यौवनोन्मत्तां वृद्धां वा युवतीमपि। कुत्सितां वा महा-दुष्टां (८) नमस्कृत्य विभावयेत्। तासां प्रहारं निन्दां च कौटिल्यमपि वर्जयेत् (९)। सर्वथा नैव कर्तव्यमन्यथा सिद्धि-रोध-कृत्।

स्त्रियो देवाः स्त्रियः प्राणाः स्त्रिय एव विभूषणं। स्त्री - सङ्गिना सदा भाव्यमन्यथा स्व - स्त्रिया अपि (१०)। विपरीत - रता सा तु (११) भविता हृदयोपरि। तद्धस्तावचितं पुष्पं (१२) तद्धस्तावचितं जलं

तद्धस्तावचितं भोज्यं देवताभ्यो निवेदयेत् । सर्वं तदक्षयं प्रोक्तं देवता-पूजनात् प्रिये ! विपरीत-रतासक्तोऽप्यष्टोत्तर-सहस्रकं । अष्टोत्तर-शतं वापि तदा सिद्धिः प्रजायते ।

स्त्री-द्वेषो नैव कर्तव्यो विशेषात् पूजनं स्त्रियाः (१३) । जप-स्थाने महा-शंखं निवेश्योर्ध्वं जपं चरेत् । स्त्रियं पश्यन् स्पृशन् गच्छन् विशेषात् कुलजां शुभां (१४) । भक्षन् ताम्बूल-मत्स्यांश्च (१५) भक्ष्य-द्रव्यं यथा-रुचि । मत्स्यं मांसं तथा क्षौद्रं नाना-द्रव्य-समन्वितं (१६) । भक्ताद्यशेष-भक्ष्याणि दत्वा द्रव्यं जपेन्मनुं । दिक्काल-नियमो नात्र स्थित्यादि-नियमो न च । सर्वथा पूजयेद् देवीमस्नातः कृत-भोजनः । महा - निश्यशुचौ देशे बलिं मन्त्रेण दापयेत् ।

न जपे काल-नियमो नार्चादिषु बलिष्वपि । स्वेच्छा-नियम उक्तोऽत्र महा-मन्त्रस्य साधने । वस्त्रासन-देहागार-स्थान-स्पर्शा-दि-वारिणः (१७) । शुद्धिं न चाचरेत् तत्र निर्विकल्पं मन-श्चरेत् । सर्व एव शुभः कालो नाशुद्धिर्विद्यते क्वचित् । न विशेषो दिवा-रात्रौ न सन्ध्यायां महा-निशि । नात्र शुद्धेरपेक्षा-ऽस्ति न चामेध्यादि-दूषणं । सुगन्धि-श्वेत-लौहित्य-कुसुमैरर्चयेद् दलैः । विल्वैर्मरुवकाद्यैश्च तुलसी-वर्जितैः शुभैः । नाधर्मो विद्यते सुभ्रु ! किं च धर्मो महान् भवेत् । स्वेच्छाचारोऽत्र गदितः प्रचरेद् धृष्ट - मानसः (१८) । कृतार्थं मन्यमानस्तु सन्तुष्टो हृष्ट-मानसः ।

इत्याचार-परः श्रीमान् जप-पूजादि-तत्परः। पालकः कुल-तत्वानां पर-तत्वे प्रलीयते। उदिताकृतिरानन्द - मयः (१६) संसार-मोचकः। अणिमाद्यष्ट-सिद्धीशः साधको देवता (२०) भवेत्।

।। इति श्रीकाली-तन्त्रे आचार-विधिः नाम अष्टमः पटलः ।।

पाठभेद

१ कृत्वा, २ भावन, ३ स्वयं चैव, ४ सुखं, शुभं, ५ स्वयं च युवती - रूपं भावयेद् यत - मानसः, ६ सु - संयतः, ७ दृष्टिः प्रजायते, ८ महा-नष्टां; तथा दुष्टां, ९ मप्रियं तथा, १० स्व-स्त्रियामपि, ११ विपरीत-रतासक्ता, १२ पयः, १३ कुलजां शुभां, १४ भुञ्जानो मदनोद्गतः, १५ गन्ध-ताम्बूल-माल्यं च; भक्षँस्ताम्बूलमन्यांश्च भक्ष्य-द्रव्यान्, १६ भक्ष्य-द्रव्यान् यथाविधि; मांस-मत्स्य-दधि-क्षौद्र - पयः-शाकाद्यमैक्षवम्, १७ वारिणां, १८ शुद्ध - मानसः; भ्रष्ट-मानसः, १९ मदिरानन्द - मानसः संसार-मोचकः सदा; मदिरानन्द - चित्तस्तु संसार - मोचकः सदा, २० सिद्धीनामाश्रयः साधको।

नवमः पटलः

विद्या-फल-विधिः

भैरव उवाच—एवं समस्त-विद्यानां राज्ञी स्तोतुं न शक्यते। वक्त्र-कोटि - सहस्रैस्तु जिह्वा-कोटि-शतैरपि। सर्व-सिद्धि- (१) परा भूमिरनिरुद्ध-सरस्वती। तस्मादस्या ज्ञान-मात्रात् सिद्धयोऽष्टौ भवन्ति हि। अनिरुद्ध-सरस्वत्या ज्ञान - मात्रेण साधकः। पाण्डित्ये च कवित्वे च वागीश-समतां व्रजेत्। तस्य पाण्डित्य-

वैदग्ध्य-विचित्र-पद-कल्पनात् (२)। देवा अपि विलज्जन्ते किं पुनर्मानवादयः।

अस्ति चेत् त्वत्-समा नारी मत्-समः पुरुषोऽस्ति चेत्। अनिरुद्ध - सरस्वत्याः समो मन्त्रोऽस्ति वै तदा। अस्या जपो ब्रह्म-जपो ज्ञानमस्यात्म-चिन्तनं। योग-सन्धारणा सम्यग् ध्यानमस्या न संशयः। महापदि महा-पापे महा-ग्रह-निवारणे। महा - भये महोत्पाते महा - शोके महाऽमये (३)। महा - मोहे महाऽसौख्ये महा-दारिद्र्य-संकटे। महाऽरण्ये महा-शून्ये महा - स्थाने (४) महा-रणे। दुराख्याने (५) दुरावासे दुर्भिक्षे दुर्निमित्तके। समस्त-क्लेश-संघाते स्मरणादेव नाशयेत्।

अस्या ज्ञानं ब्रह्म-ज्ञानं (६) ध्यानमस्यात्म-चिन्तनं। तस्मादस्याः समा विद्या नास्ति तन्त्रे न संशयः। श्मशान - शयनो वीरः (७) कुल-स्त्रीभिर्विहार-वान्। कुलामृत-निषेवी च काली-तन्त्रार्थ - चिन्तकः। ब्रह्मादि - भवने तस्य समो नास्ति कुतः परः (८)।

स एव सुकृती लोके स एव कुल-भूषणः। धन्या च जननी तस्य येन देवी समर्चिता। वक्त्रे सरस्वती तस्य लक्ष्मीस्तस्य सदा गृहे। तीर्थानि देहे तिष्ठन्ति येन देवी समर्चिता। धनेन धन-नाथश्च तेजसा भास्करोपमः। बलेन (९) पवनो ह्येष येन देवी समर्चिता। गानेन तुम्बुरुः साक्षाद् दाने कर्ण-समस्तथा (१०)। दत्तात्रेय-समो ज्ञानी येन देवी समर्चिता। वह्निरिव रिपोर्हन्ता

गंगेव मल-नाशकः। शुचौ शुचि-समः साक्षादिन्दो (११) रिव सुख-प्रदः। पितृ-देव-समः शास्ता कालस्येव दुरासदः। वारीश इव गम्भीरो निर्घात इव (१२) दुर्द्धरः। वृहस्पति-समो वाग्मी धरणी-सदृशः क्षमी। कन्दर्प-सदृशः स्त्रीणां (१३) येन देवी समर्चिता।

अहो भाग्यमहो लोके कुल-ज्ञान - परायणः (१४)। तेषां मध्येऽपि यः (१५) कोऽपि काली-साधन-तत्परः। त्यजसि त्वं वरं चैतत् (१६) पुमांसं परमं तथा। मादृशं (१७) तु क्वचित् काले त्यजसि कदाचन (१८)। काली-ज्ञानिनमासाद्य न त्यजसि कदाचन। नहि काली-समा विद्या (१९) नहि काली-समं फलं। नहि काली-समं ज्ञानं नहि काली-समं तपः। ये गुणाः परमेशस्य पञ्च - कृत्य - दिधायिनः। ते गुणाः सन्ति सर्वज्ञे (२०)! काली-तत्वस्य नान्यथा। कालिका-हृदय-ज्ञानी लता-साधन-तत्परः। देव-वनन्मानवो भूत्वा लभेन्मुक्ति च शाश्वतीं (२१)।

इति ते कथितं सम्यक् कालिका-तत्वमुत्तमं (२२)। अनेन सम्यगास्थाय सर्व-धर्म-(२३) फलं लभेत्।

॥ इति श्रीकाली-तन्त्रे विद्या-फल-विधिर्नाम नवमः पटलः ॥

पाठ-भेद

१ सर्व-सिद्धेः; सर्व-शुद्धेः, २ जल्पनात्; ३ महाजये; महोत्सवे। ४ महाऽज्ञाने, ५ दुराध्वाने; दुरापदे, ६ ज्ञानमेव, ७ श्मशाने शयने वीरः; श्मशाने वीर-शयनः, ८ समोऽस्ति किमु चापरः। ९ वेगेन,

१० दानेन वासवो यथा; दैश्वर्ये वासवो यथा, ११ दिन्दु, १२ नृसिंह इव; निर्ऋतेरिव, १३ स्त्रीषु, १४ कुल-ज्ञानी भवेन्नरः, १५ मध्ये प्रियः; मध्ये च यः, १६ परं चैव; न कदाचित्, १७ महेशं, १८ जगन्मये; शुचिस्मिते, १९ पूजा, २० सर्वेऽपि, २१ चतुर्विधां, २२ काल्यास्तत्वमनुत्तमं, २३ सर्व-काम।

दशमः पटलः

सिद्ध-विद्या-विधिः

यथा काली तथा दुर्गा यथा दुर्गा तथोन्मुखी। यथा तारा तथा काली (१) यथा नीला तथोन्मुखी। दुर्गायाः कालिकायास्तु ध्यानं समम्िहोच्यते (२)। महा-चीन-क्रमेणैव तारा शीघ्र-फल-प्रदा। गन्धर्वाख्य-क्रमेणैव पञ्चमी भुक्ति-मुक्तिदा (३)। महा-चीन-(४) क्रमेणैव कालिका फल(५)-दायिनी। कालिकोग्र-मुखी शस्ता दत्तात्रेय-विभाविता (६)। सप्त-सप्तति-भेदेन (७) श्रीविद्या विदिता भुवि। तासां तु समता ज्ञेया गुप्त - साधन-साधने। चत्वारिंशत्-प्रकारा च (८) भैरवी परिकीर्तिता। तासां तु समता ज्ञेया गुप्त-साधन-साधने। या या (९) विद्या महा-चण्डा तासामेष (१०) विधिर्मतः। महा-चीन (११)-क्रमेणैव छिन्नमस्ता च सिद्धिदा (१२)। यस्मिन् मन्त्रे य आचारस्तस्मिन् (१३) धर्मस्तु तादृशः। कृतार्थस्तेन जायेत स्वर्गो वा मोक्ष एव (१४) वा। भ्रान्तिरत्र न कर्तव्या सिद्धि-हानिस्तु जायते।

विशुद्ध-चित्तोऽत्र भवेत् सिद्धिः स्यादपवर्गदा । एवं तु तत् (१५) क्षणात् सिद्धिर्विस्मयो नास्ति चापरः । विस्मिता विलयं यान्ति पशवः शास्त्र-मोहिताः ।

भैरव उवाच—कालिका-हृदयं विद्यां सिद्ध-विद्यां महोदयां । पुरा येन यथा जप्त्वा सिद्धिमापुर्दिवौकसः । कामाक्षरं वह्नि-संस्थमिन्दिरा-नाद-विन्दुभिः । मन्त्र-राजमिदं ख्यातं दुर्लभं पाप-चेतसां । सुलभं शुभदं (१६) भक्त्या साधकानां महात्मनां । त्रिगुणा तु विशेषेण सर्व-शास्त्र-प्रबोधिका । अनया सदृशी विद्या नास्ति सारस्वत - प्रदा । आकर्षण-वशीकार - मारणोच्चाटनं तथा । शान्ति-पुष्ट्यादि-कर्माणि साधयेदनयाऽचिरात् । किं वक्त-व्यमनेनापि वर्णितुं नैव शक्यते । जिह्वा-कोटि-सहस्रैस्तु वक्त्र-कोटि-शतैरपि । अनया सदृशी विद्या अनया सदृशो जपः । अनया सदृशं ज्ञानं न भूतं न भविष्यति ।

ध्यान-पूजादिकं सर्वं साधनं च पुरस्क्रिया । अनिरुद्ध-सरस्व-त्याः समानं सर्वमीरितम् (१७) । रक्तैराकर्षणे पुष्पैः पीतैः स्त-म्भन-कर्मणि । मारणे कृष्ण-पुष्पैस्तु पूजयेद् घोर-(१८) दक्षिणां ।

आद्यैक-वीजं वीजानां तथैवान्तेऽपि चैककं (१९) । दक्षिणे कालिके चेति मध्ये संयोज्य मन्त्र-वित् । स्वाहान्तं मन्त्रमुच्चार्य भवेदाकर्षणं महत् । लोहितांकुश-हस्तां च एक-शूल-धरां (२०) तथा । महाकाल-समासीनां (२१) ध्यात्वा चाकर्षणं महत् (२२)। स्थावरं जङ्गमं चैव पाताल - तलगं (२३) तथा । आकर्षयति

मन्त्रज्ञः किमन्यद् भुवि योषितः। अयुतैक-जपः प्रोक्तः सदाकर्षण-कर्मणि।

अथान्यत् सम्प्रवक्ष्यामि वशीकरणमुत्तमं। कूर्च-लज्जा-द्वयं वीज-द्वयंठान्तं(२४) तथैव च। योजयित्वा जपेद् विद्यामयुतं (२५) वशयेद् ध्रुवं (२६)। ध्यानमस्याः (२७) प्रवक्ष्यामि येन वश्यं जगत्-त्रयं। नाग-यज्ञोपवीतां च चन्द्रार्द्ध-कृत-शेखरां। जटा-जूट-समासीनां (२८) महाकाल-समीपगां (२९)। एवं काम-शरा-विद्धा (३०) विह्वला काम-मोहिताः (३१)। स्वं स्वं सन्त्यज्य (३२) भर्त्तारं यान्ति लोक-त्रयाङ्गनाः (३३)।

अथ वक्ष्ये महा-विद्यां सिद्ध-(३४) विद्यां महोदयां। भैर-वेण पुरा प्रोक्ता (३५) काली-हृदय-संज्ञितां (३६)। अस्या ज्ञान-प्रभावेण कलयामि जगत्-त्रयं। प्रणवं पूर्वमुद्धृत्य (३७) हृल्लेखा-बीजमुद्धरेत्। रति-बीजं समुद्धृत्य (३८) प-पञ्चम-भगान्वितं। ठ-द्वयेन समायुक्ता विद्या-राज्ञी मयोदिता (३९)। अनया सदृशी विद्या कालिकायास्तु दुर्लभा।

भैरवोऽस्य ऋषिः प्रोक्तो विराट् छन्द उदीरितं (४०)। सिद्ध-काली ब्रह्म-रूपा देवता भुवनेश्वरी। रति-वीजं वीजमस्या हृल्लेखा शक्तिरुच्यते। हृल्लेखया षड्-दीर्घेन प्रणवाद्येन कल्पयेत्। अङ्ग-षट्कं ततो न्यस्य ध्यात्वा देवीं शिवो भवेत्।

खड्गोद्भिन्नेन्दु-बिम्ब-स्रवदमृत-रसाप्लाविताङ्गी त्रिनेत्रा। सव्ये पाणौ कपालाद् गलदमृत (४१) मथो मुक्त-केशी पिवन्ती।

दिग्वस्त्रा बद्ध-काञ्ची मणि-मय-मुकुटाद्यैर्युता दीप्त-जिह्वा।
पायान्नीलोत्पलाभा रवि-शशि-विलसत्-कुण्डलालीढ़-पादा।

जपेद् विंशति-साहस्रं सहस्रैकेण संयुतं। होमयेत् तद्दशांशेन मृदु-पुष्पेण मन्त्र-वित्। त्रिकोणं कुण्डमालिख्य (४२) सिद्ध-विद्यः शिवो भवेत्। पूजनं च प्रयोगं च दक्षिणा-वद्रुपाचरेत्। एकाक्षर्या महा-कल्प-समानं सर्वमेव वा।

रक्त-पद्मस्य (४३) होमेन साक्षाद् वैश्रवणो (४४) भवेत्। बिल्व-पत्रस्य होमेन राज्यं भवति (४५) निश्चितं। रक्त-प्रसून-होमेन वशयेदखिलं जगत्। पीत-पुष्पस्य होमेन स्तम्भयेद् वायु (४६) मप्यथ। मालती-पुष्प-होमेन साक्षाद् वाक्-पति-सन्निभः। कृष्ण-पुष्पस्य होमेन शत्रून् मारयतेऽचिरात्। अत्र सर्वस्य होमस्य (४७) संख्या स्यादयुतावधि।

अस्या-स्मरण-मात्रेण महा-पातक-कोटयः। सद्यः प्रलयमायान्ति साधकः खेचरो भवेत्।

॥ इति श्रीकाली-तन्त्रे सिद्ध-विद्या-विधिः नाम दशमः पटलः ॥

पाठ-भेद

१ नीला, २ सम्यगिहोदितं; सममिहोदितं, ३ भुवि दुर्लभा, ४ नील, ५ सिद्धि, ६ विभावना, ७ भेदा सा, ८ प्रकारेण, ९ महा, १० मेव, ११ नील, १२ विधिर्मतः; विधिः स्मृतः, १३ तत्र, १४ स्वर्ग वा; मोक्षमेव; मुक्तिरेव; मोक्षश्च एव, १५ एतत् तु तत्; तत्र तत्र।

१६ सुलभा शुभदा, १७ समं पूर्ववदाचरेत्; साधनं सर्वमीरितं; साधनं पूर्वमीरितं, १८ पूजयेदेव। १६ अस्यैकैकं तु वीजानां तथैवान्ते च चैककं; अद्यैककं तु बीजानां तथैवान्ते च एककं, २० लोहितांगुलि-हस्ता च एक-शूल-धरा।

२१ कालाग्रमासीना, २२ भवेत्; चरेत् २३ तलगा, २४ वीज-द्वयं चान्ते; वीज-द्वयं चान्ते; वीजं द्वयं ठान्तं, २५ नियुतं, २६ वश कर्मणि, २७ मन्त्रः; मन्त्रं, २८ जटा-युक्तां च सञ्चिन्त्य, २९ समीपतः।

३० काम-समा विद्या; काम-समाविद्धा, ३१ निर्लज्जा विक्लवाः स्त्रियः, ३२ स्वयं संगृह्य, ३३ आलिङ्गन्ति सदैव तं, ३४ सिद्धि, ३५ प्रोक्तां, ३६ संस्थिता; सज्ञिता, ३७ मुच्चार्य, ३८ समुच्चार्यं, ३९ प्रकीर्तिता; महोदया, ४० उदाहृतं, ४१ दसृज, ४२ मासाद्य, ४३ पुष्पस्य, ४४ वैश्वानरो, ४५ प्राप्नोति, ४६ वह्नि, ४७ सर्वेषु होमेषु।

एकादशः पटलः

सामान्य-साधनं

भैरव उवाच—अथोच्यते कालिकायाः सामान्य - साधनं प्रिये ! कृतेन येन विधिवत् पलायन्ते महापदः। शिवा-बलिश्च दातव्यः सर्व-सिद्धिमभीप्सुभिः।

महोत्पाते महा-घोरे महा-रोगे (१) महा-ग्रहे। महापदि महा-युद्धे महा-विग्रह-संकुले (२)। महा-दारिद्र्य-शमने महा-दुःस्वप्न-दर्शने (३)। महाऽशांतौ महा-वश्ये (४) महाऽस्वस्त्ययने तथा।

घोराभिचार-शमने (५) घोरोपद्रव-नाशने। कूट-युद्धादि-शमने (६) कूट-शत्रु-निवारणे (७)। राजादि-भय-शान्तौ च राज-क्रोध-प्रशान्तये (८)। न ददाति बलिं यस्तु शिवायै शिवताप्तये (९)। स पापिष्ठो नाधिकारी कुल-देव्याः समर्चने (१०)।

कुलीनं नावमन्येत कुलज्ञं (११) परिपूजयेत्। कुलज्ञेषु प्रसन्नेषु (१२) कालिका-सन्निधि-(१३) र्भवेत्। अहो धन्यवतां (१४) लोके जानाति (१५) कुल-दर्शनं। तेषां मध्ये तु यः कश्चित् (१६) कुल-देवीं समर्चयेत्। कुलाचार-विहीनो यः पूजयेत् कालिकां नरः। स स्वर्ग-मोक्ष-भागी च न स्यात् सत्यं न संशयः।

आयुरारोग्यमैश्वर्यं बलं पुष्टिं महद्-यशः। कवित्वं भुक्ति-मुक्ती च कालिका-पाद-पूजनात्। शुक्लेन ध्यान-योगेन कविता (१७) वश-वर्तिनो। पीतेन ध्यान-योगेन स्तम्भये (१८) दखिलं जगत्। कृष्णाभा शत्रु-मरणे धूम्राभा (१९) वैरि-निग्रहे। अनया विद्यया मन्त्री स्पृशेत् पातकिनं यदि। स तु संस्पर्श-मात्रेण वक्ति सौधीमनर्गलां (२०)। कुमारी-पूजनं कुर्यात् सर्व-धर्म-(२१) फलाप्तये।

भैरव उवाच—अथान्यत् संप्रवक्ष्यामि प्रयोगं शत्रु-निग्रहं। सर्वान्ते वह्नि-वनितां योजयित्वाऽयुतं जपेत्। कालिकां (२२) द्विभुजां कर्तृ-कपाले सव्य-दक्षिणे (२३)। एवं ध्यात्वा तु शत्रूणां मारणं समुपाचरेत् (२४)।

एवं काली-मतं प्रोक्तं सर्व-सिद्धि-प्रदायकं (२५)। अनया विद्यया सम्यक् साधयेत् स्व-मनोषितं। अनया विद्यया यद्-यन्न साधयति (२६) साधकः। तत्तत् सर्वेषु तन्त्रेषु नास्ति सत्यं न संशयः।

काल-नियन्त्रणात् काली ज्ञान - तत्व - प्रदायिनी (२७)। तस्मात् सर्व-प्रयत्नेन यजेदुभय - (२८) सिद्धये। काली-मतमिदं दिव्यं भैरवेण प्रकाशितं। न कुत्रापि प्रवक्तव्यं साधते च (२९) स्व-पौरुषं। एतत्तन्त्रं च मन्त्रं च ध्यानं चैव प्रपूजनं। प्रकाशात् सिद्धि - हानिः स्यात् तस्माद् यत्नेन गोपयेत्। तस्मात् सर्व-प्रयत्नेन गोप्तव्यं देवता-गणैः (३०)। यथा मनुष्यो लभ्येत (३१) तथा कार्यं महेश्वरि ! यो भक्तः साधयेद् ज्ञानी तस्मै नित्यं (३२) प्रकाशयेत्।

॥ श्रीकाली-तन्त्रे सामान्य-साधनं नाम एकादशः पटलः ॥

पाठ-भेद

१ महा-रोगे महोत्पाते महा-दोषे; महा-रोगे महा-दोषे; महा-दोषे, २ संकुल-संग्रहे; निग्रह-संकुले, ३ दुःख-प्रदर्शने, ४ वल्ये; बाल्ये, ५ घोराभिगमने घोरे, ६ युद्धाभिगमने, ७ निपातने, ८ राजोपद्रव-नाशने, ९ तृप्तये, १० स पापिष्ठो न लज्जेत् कुल-देव्याः समर्चने; स पापिष्ठस्तु लज्जेत् कुल-देव्याः प्रपूजने, ११ देवी-वत्, १२ कुलजेषु, १३ सन्निधौ, १४ भाग्यवत्तां; धन्यतरां, १५ तथेति; जानन्ति, १६ ऽपि यः कोऽपि।

१७ कालिका, १८ वशये, १९ कृष्णेन शत्रु-शमनं धूम्राभं, कृष्णाभां शत्रु-मरणे धूम्राभां, २० वह्नि-सौधीं निराकुलं; मुक्ति-सौख्यमनर्गलं, २१ कर्म, २२ कपिलां, २३ दक्षिणां, २४ समुदाहृतं, २५ सिद्धिरनुष्ठितं; सिद्धेरनुष्ठितं, २६ धारयति, २७ प्रदर्शिनी, २८ दभय, २९ साधकेन, ३० हि त्वया प्रिये, ३१ मर्त्यो न लभते, ह्यन्यो न लभते, ३२ साधको मन्त्री तस्मै सत्यं; साधको ज्ञानी तस्मै ज्ञानं; साधको ज्ञानी तस्मै नित्यं।

द्वादशः पटलः

परम-गुह्याचारः

भैरव उवाच—त्वयोक्तं पूजनं देव ! साधनेन पुरस्कृतं। इदानीं श्रोतुमिच्छामि वीर-नित्य-क्रियां प्रभो !

भैरव्युवाच—प्रातःकृत्यं ततो न्यास ऋष्याद्यङ्गांगुलैरपि। वर्ण-व्यापक-विन्यासः पीठ-न्यासस्ततः परं। ततोऽन्तर्यजनं देवि ! योगि-योगानिशा प्रिये ! पञ्चमानां प्राशनं च जपो रात्रौ विधानतः। स्तोत्र-पाठो यत्र-तत्र समये च वरानने ! वीर-श्रद्धा तर्पणं च तथालापः स्त्रियामपि। विजयाङ्गीकृतिश्चैव स्व-सुखोद्देशिनं तथा। अप्रकाशः कुलाचारे मृदु-भाषा च सर्वतः। गुर्वनुज्ञा-मात्रेणैव सर्वाचार-विधिः प्रिये !

एवमादीनि चान्यानि वीर-निन्दा न सुव्रते ! ऐति परम्परया ह्येन च रुद्रा देवि ! तच्चीने प्रतिष्ठितं। अन्यत्र विषयेन्नास्ति सत्यमेतद् ब्रवीमि ते। वामाचारः कुलाचारश्चीन-नाथेन शङ्क-

रात् । प्रकाशितः शङ्करेण महा-रुद्रात् प्रकाशितः । महा-चीनाधिपो देवो माहात्म्येन तयोर्द्वयोः । कुलाचारं कुल-श्रेष्ठे वामाचारः प्रयत्नतः । अस्यैवाशेष-माहात्म्यं चीन-तन्त्रे मयोदितं । कुलाचारमशेषेण चीन-नाथेन वेत्स्यपि ।

यद् यद् दृष्टं श्रुतं यद् यद् गुरुः साधक-वक्त्रतः । ततत् कार्यं वीर-वर्यैस्तेन सिद्धिर्भवेत् प्रिये - क्वचिच्चण्डः क्वचिद्भण्डः क्वचिद्-भूत - पिशाच-वत् । क्वचिद्-देवार्च्चन-रतः क्वचित्तन्निन्दकस्तथा । भवेच्छील-रतो वीरो महा-रुद्रस्य शासनात् ।

भक्षणं च विधिं वक्ष्ये पञ्चमादेर्यथा-विधि । आदौ गुरुं स्मरन् पश्चात् कुण्डलीं परिभाव्य च । आजिह्वान्तस्तर्पणेन भक्षयेन्नति-पूर्वकं । गुरुं नत्वा तपो-ज्येष्ठं शक्तेर्नति-परायणः । ज्येष्ठत्वं वा कनिष्ठत्वं कुलाचार-विधानतः । अभिषेक्ता गुरुः साक्षान्मन्त्रदेन समः स्मृतः । अभिषेके विना भूते प्रधानत्वं करोति यः । चत्वारि तस्य नश्यन्ति आयुर्विद्या यशो बलं । तद्विधिश्चोत्तरातन्त्रे पाशवेन विमिश्रितः । वीरैर्ग्राह्यः प्रयत्नेन हंसैः क्षीरं जलाद् यथा । आचारोऽयं शक्ति-मन्त्रे सर्वत्र परि-कथ्यते ।

विशेषात् कालिका-तारा - भैरव्यादिषु पञ्चसु । कालिकातारिणी-भेदं यः करोति स नारकी । यत्र यत्र कालिकेति नाम संश्रूयते प्रिये ! तत्र तारा - विधानं च युते नात्र संशयः । यद् यदन्यत् साधनं च नान्यत्रापि नोदितं । तत् सर्वं पूर्व-पूर्वेण तन्त्रेण ज्ञायते प्रिये ! न पूजा न्यास - जालं वा स्त्रीणां - केवल-जपतः । सिद्धिर्भवति देवेशि ! कुलाचार-विधानतः ।

अथ चेत् क्रियते न्यासस्तदा श्रृणु विधिं प्रिये ! ऋष्याद्यङ्गक-पीठानां न्यासं कृत्वा च संस्मरेत् । ततः साहमिति ध्यायेन्महा-चीन-मतं यथा ॥ काली-तन्त्रं कौल-तन्त्रं तारा-तन्त्रं तथा प्रिये ! चीन-तन्त्रं स्वतन्त्रं च युगपद्वक्त्रतः स्मृतं । अथ यद्यन्मतं प्रोक्तं तत्पश्चसु समाचरेत् । गुरु-पाद-प्रसादेन शुभादृष्टस्य योगतः । आचारः प्राप्यते वीरैर्नात्र कार्यश्च संशयः । तदैव तुष्टा सा देवी निर्विकल्पः स्वयं यदि ।

।। इति श्री काली-तन्त्रे परम-गुह्याचारः नाम द्वादशः पटलः ।।

परिशिष्ट

ध्यान एवं मन्त्र

'क्रीं'-बीजे शशि-शेखरे घन-कुचि श्यामे त्रिनेत्रे शिवे !
खड्ग-छिन्न-शिरो-वराभय-करे! भो मुण्ड-माल-प्रिये ।।
प्रत्यालीढ - पदे शवोपरि महा-कालेन सार्द्धं रते !
आत्मायस्व दिगम्बरि स्मित-मुखि श्रीदक्षिण-कालिके ।।

भगवती दक्षिण-कालिका का उक्त ध्यान पूज्य स्वामी सदाशिव तीर्थ के हस्ताक्षरों में उनसे प्राप्त 'काली-तन्त्र' की प्रति के प्रारम्भ में अङ्कित है । इस ध्यान के द्वारा श्री जगदम्बा के दिव्य स्वरूप को हृदयङ्गम करने में साधकों को सहायता मिलती है । इसी प्रकार 'तन्त्रसार' में भगवती के मन्त्र की जो व्याख्या दी गई है, उससे मन्त्रार्थ को समझना सरल हो जाता है । व्याख्या इस प्रकार है—

'क्रीं'-कारो मस्तकं देवि ! 'क्रीं'-कारश्च ललाटकम् ।
नेत्र-त्रयश्च 'क्रीं' - कारो 'हूँ' - कारेण च नासिका ।।

'हूँ'-कारो मुख-पद्मं स्यात् 'ह्रीं'-कारः कर्ण-युग्मकम् ।
'ह्रीं'-कारेण भवेद् ग्रीवा 'द'-कारश्चिबुकं भवेत् ।।

'क्षि'-कारेण भवेद् दन्तो 'णे'-कारेनोष्ठ-युग्मकम् ।
'का'-कारेण स्तन-द्वन्द्वं 'लि' - कारः पृष्ठ - देशकः ।।

'कें' - कारेण भवेद् बाहुः 'क्रीं' - कारेणोदरं भवेत् ।
'क्रीं'-कारो नाभि-देशः स्यात् 'क्रीं'-कारश्च नितम्बकः ।।
'हूँ'-कारो योनि-रूपः स्यात् 'हूँ' - कारेणोरु-युग्मकम् ।
'ह्रीं'-कारो जानु-युग्मं स्यात् 'ह्रीं'-कारो गुल्फ-देशकः ।
'स्वा' - शब्देन पद - द्वन्द्वं 'हा' शब्दैर्नख - वरं तथा ।

भगवती काली विषयक साहित्य

काली-कल्पतरु **२५-००**

भगवती श्री काली के सम्बन्ध में प्रायः सभी प्रकार की आवश्यक जानकारी प्राप्त करने के लिये यह निवन्ध-संग्रह प्रकाशित हुआ है। इसमें कुल पांच प्रकार के निवन्ध संग्रहीत हैं—१ काली-तत्व - संग्रह, २ काली-महिमा, ३ काली-मन्त्र-साधना (यन्त्र व मन्त्र-परिचय), ४ काली के उपासक, ५ काली का प्रकाशित साहित्य।

काली-नित्यार्चन (प्रामाणिक पूजा-पद्धति) **६-००**

काली-स्तव-मञ्जरी **१५-००**

इस नवीन संस्करण में भगवती काली के ३२ स्तोत्र कवच, हृदय, शतनामादि हैं। गुप्तावतार वावाश्री की पाण्डु-लिपि से अनेक दुर्लभ स्तोत्रों का समावेश किया गया है। 'आम्नाय-

धुरन्धर' स्व० पं० हरिशास्त्री दाधीच कृत 'काली-कस्तूरी-स्तव-राज' भी पहली वार प्रकाशित किया गया है। भ० दक्षिणा काली का दुर्लभ रङ्गीन चित्र है।

'एकाक्षरी कालिका कवच' और 'मन्त्र-सिद्धिदं कवचं' का भी पहले-पहल प्रकाशन हुआ है। प्रायः सभी स्तोत्रों का हिन्दी-रूपान्तर भी दिया गया है, जिससे यह संग्रह विशेष उपयोगी हो गया है।

ककारादि-काली-नाम साहस्त्रं	३-००
काली कर्पूर स्तवः (सविधि)	२-००
काली सहस्त्रनाम साधना	२-००
कालिका कवचम्	०-५०
काली तन्त्र (भाषा-टीका-सहित)	५-००
शक्ति-संगम-तन्त्र (सुन्दरी-खण्ड)	२५-००
शक्ति-संगम-तन्त्र (काली-खण्ड)	२५-००

शक्ति-सङ्गम-तन्त्र (सुन्दरी खण्ड) में भगवती काली की नित्याओं के पूजा-विधान के साथ ही नित्याओं के यन्त्रों के रेखा-चित्र पहले पहल प्रकाशित किये गये हैं।

हिन्दी महा-निर्वाण तन्त्र (काली का मुख्य तन्त्र) २०-००